प्रालेयांशुः, पुं, (प्रालेयाणि हिमानि तद्वत् शीता वा अंशवो यस्य ।) चन्द्रः । इति हलायुधः ॥ (यथा, माघे । ६ । ८७ ।
"इत्थं नारीर्घटयितुमलङ्कामिभिः काममासन्
प्रालेयांशोः सपदि रुचयः शान्तमानान्त-
रायाः ॥")

प्रावटः, पुं, (प्र+अव+अट्+अच् । शकन्ध्वादित्वात् साधुः ।) यवः । इति जटाधरः ॥

प्रावरः, पुं, (प्रावृणोत्यनेनेति । प्र+आ+वृ+करणे अप् ।) प्राचीरम् । इति शब्दरत्नावली ॥

प्रावरणं, क्ली, (प्रावृणोत्यनेन गात्रमिति । प्र+आ+वृ+करणे ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रच्छादनम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६७४ ।
"वल्कीपादमुद्राङ्कचारुप्रावरणादि सः ।
गौरवार्हान् दुराचारैः सचिवान् पर्य्यधापयत् ॥")
प्रकृष्टावरणञ्च ॥

प्रावारः, पुं, (प्राव्रियते गात्रमनेनेति । प्र+आ+वृ+करणे घञ् ।) उत्तरासङ्गः । उत्तरीयवस्त्रम् । इत्यमरः ॥ (यथा, महाभारते ।२।४८।६।
"आच्छादयसि प्रावारानश्नासि पिशितौदनम् ।
आजानेया वहन्त्यश्वाः केनासि हरिणः कृशः ॥")

प्रावारकीटः, पुं, (प्रावारस्य कीटः ।) कीटविशेषः । तत्पर्य्यायः । कुणः २ । इति जटाधरः ॥

प्रावृट्, [ष्] स्त्री, (प्रकर्षेण आ सम्यक्प्रकारेण च वर्षतीति । प्र+आ+वृष्+क्विप् । प्रावर्षत्यत्रेति आधारे क्विप् वा । यद्वा, वर्षणमिति वृट् प्रकृष्टा वृट् च । "नहिवृतिवृषीति ।" ६ । ३।११६ । इति पूर्व्वपदस्य दीर्घः ।) वर्षाकालः । श्रावणभाद्रमासौ । इत्यमरः । १ । ४ । १६ ॥ (यथा, रघौ । ६ । ५१ ।
"अध्यास्य चाम्भः पृषतोक्षितानि
शैलेयगन्धीनि शिलातलानि ।
कलापिनां प्रावृषि पश्य नृत्यं
कान्तासु गोवर्द्धनकन्दरासु ॥")

प्रावृड़त्ययः, पुं, (प्रावृषः अत्ययो नाशो यत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

प्रावृतं, त्रि, (प्राव्रियते स्मेति । प्र+आ+वृ+क्तः ।) प्रकृष्टावरणम् । ओड़ितवस्त्रम् । इति भरतः ॥ तत्पर्य्यायः । निवीतम् २ । इत्यमरः ॥ निवृतम् ३ । इति तट्टीकायां स्वामी ॥

प्रावृतिः, स्त्री, (प्रावृणोति प्रकर्षेण आच्छादयति दृष्टिपथमनयेति । प्र+आ+वृ+करणे क्तिन् ।) प्राचीरम् । इति शब्दरत्नावली ॥ (मलः । यथा, सर्व्वदर्शनसंग्रहे शैवदर्शने ।
"प्रावृतीशौ बलं कर्म्म मायाकार्य्यं चतुर्विधम् ।
पाशजालं समासेन धर्म्मनाम्नैव कीर्त्तिता ॥"
"अस्यार्थः । प्रावृणोति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति प्रावृतिः स्वाभाविकाशुचिर्मल इति ॥")

प्रावृषा, स्त्री, (प्रावृष्+हलन्तात् टाप् वा ।) घनागमः । वर्षाकालः । इति त्रिकाण्डशेषः ॥

प्रावृषायणी, स्त्री, (प्रावृषायां अयनमुद्भवो यस्याः । गौरादित्वात् ङीष् ।) कपिकच्छुः । इत्यमरः ।२।४।६॥ आलकुशी इति भाषा ॥

प्रावृषिकः, पुं, (प्रावृषि वर्षाकाले कायति शब्दायते इति । कै+कः । अलुक्समासः ।) मयूरः । इति धरणिः ॥ (प्रावृषि भवः । प्रावृष्+ठक् ।) प्रावृट्कालभवे, त्रि ॥

प्रावृषेण्यः, पुं, (प्रावृषि भवः प्रावृट् देवतास्य वेति । प्रावृष्+"कालेभ्यो भववत् ।" ४।२।३४। इति "प्रावृष एण्यः ।" ४ । ३ । १७ । इति एण्यः ।) कदम्बवृक्षः । इति मेदिनी ॥ कुटजवृक्षः । धाराकदम्बः । इति राजनिर्घण्टः ॥

प्रावृषेण्यः, त्रि, (प्रावृषि भव इति । प्रावृष्+एण्यः ।) प्रावृट्कालभवः । इति मेदिनी ॥ (यथा, रघौ । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥")
प्राचुर्य्यम् । इति शब्दरत्नावली ॥

प्रावृषेण्या, स्त्री, (प्रावृषेण्य+टाप् ।) कपिकच्छुः । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

प्रावृष्यं, क्ली, (प्रावृषि भवमिति । यत् ।) वैदूर्य्यम् । इति राजनिर्घण्टः ॥ प्रावृषि भवे, त्रि ॥

प्रावृष्यः, पुं, (प्रावृषि भव इति । प्रावृष्+यत् ।) कुटजः । धाराकदम्बः । विकण्टकः । इति राजनिर्घण्टः ॥

प्राशितं, क्ली, (प्रकर्षेण अशितं यत्र ।) पितृयज्ञः । इति जटाधरः ॥ (प्र+अश्+कर्म्मणि क्तः ।) भक्षिते, त्रि ॥

प्राश्निकः, पुं, (प्रश्नाय तदुत्तरप्रदानाय साधुरिति । प्रश्न+ठक् ।) सभ्यः । इति त्रिकाण्डशेषः ॥ प्रश्नकर्त्तरि, त्रि ॥

प्रासः, पुं, (प्रास्यते क्षिप्यते इति । प्र+अस्+"हलश्च ।" ३।३।१२१ । इति घञ् ।) कुन्तास्त्रम् । इत्यमरः ।२।८।९३॥ कोँच इति भाषा ॥ (यथा, महाभारते । ६ । ६७ । २३ ।
"गदाभिरसिभिः प्रासैर्बाणैश्चानतपर्व्वभिः ॥"
अस्य आकृतिलक्षणादिकं यदुक्तं शुक्रनीतौ तद्यथा,—
"प्रासाश्चन्तु चतुर्हस्तं दण्डबुध्नं क्षुराननम् ॥"
यथाच ।
"प्रासस्तु सप्तहस्तः स्याद्दीर्घत्वेन तु वैणवः ।
लौहशीर्षस्तीक्ष्णपादः कौशेयस्तवकाचितः ॥
आकर्षश्च विकर्षश्च धूननं वेधनं तथा ।
चतस्र एता गतय उक्ताः प्रासं समाश्रिताः ॥")

प्रासकः, पुं, (प्रास+संज्ञायां स्वार्थे वा कन् ।) प्रासास्त्रम् । पाशकः । इति हेमचन्द्रः ॥

प्रासङ्गः, पुं, (प्रसज्यते इति । प्र+सन्ज+घञ् । उपसर्गस्येति दीर्घः) युगम् । इत्यमरः । २ । ८ । ५७ ॥ योयालि इति भाषा । "अनसः शकटस्य सम्बन्धि अनसि सम्बद्धं वा यत् युगं ततोऽन्यत् यत् वत्सानां दमनकाले स्कन्धे आसज्यते तत् युगं प्रासङ्गः ।" इति भरतः ॥ (यथा, महाभारते । १३ । ६४ । १६ ।
"विशाखायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम् ।
सप्रासङ्गञ्च शकटं सधान्यं वस्त्रसंयुतम् ॥")

प्रासङ्ग्यः, पुं, (प्रासङ्गं वहतीति । प्रासङ्ग+"तद्वहति रथयुगप्रासङ्गम् ।" ४।४।७६। इति यत् ।) युगवोढृवृषः । इत्यमरः । २ । १ । ६४ ॥

प्रासादः, पुं, (प्रसीदन्त्यस्मिन्निति । प्र+सद्+"हलश्च ।" ३ । ३ । १२१ । इत्याधारे घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६।३।१२२। इति उपसर्गस्य दीर्घः ।) देवभूभुजां गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा, देवीभागवते । २ । ६ । ४२ ।
"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्ष-
कान् ।
कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम् ॥")
तल्लक्षणादि यथा,—

सूत उवाच ।

"प्रासादानां लक्षणन्तु वक्ष्ये शौनक ! तच्छृणु ।
चतुःषष्टिपदं कृत्वा दिग्विदिक्षूपलक्षितम् ॥
चतुष्कोणं चतुर्भिश्च द्वाराणि सूर्य्यसंख्यया ।
चत्वारिंशाष्टभिश्चैव भित्तीनां कल्पना भवेत् ॥
ऊर्द्ध्वक्षेत्रसमा जङ्घा जङ्घार्द्धद्विगुणं भवेत् ।
गर्भविस्तारविस्तीर्णा शुकाङ्घ्रा च विधीयते ॥
तत्त्रिभागेण कर्त्तव्या पञ्चभागेन वा पुनः ।
निर्गमस्तु शुकाङ्घ्राया उच्छ्रयः शिखरार्द्धगः ॥
चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम् ।
चतुर्थे पुनरस्यैव कण्ठमामलसारकम् ॥ * ॥
अथवापि समं वास्तु कृत्वा षोड़शभागिकम् ।
तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् ॥
भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत् ।
चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः ॥
द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः ।
शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः ॥
चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः ।
पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥
भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः ।
गर्भक्षेत्रसमो भागादग्रतो मुखमण्डपः ॥
एतत् सामान्यमुद्दिष्टं प्रासादस्य हि लक्षणम् ।
लिङ्गमानमथो वक्ष्ये पीठो लिङ्गसमो भवेत् ॥
द्विगुणेन भवेद्गर्भः समन्ताच्छौनक ! ध्रुवम् ।
तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा ॥
द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक ! ।
पीठं गर्भावरं कर्म्म तन्मानेन शुकाङ्घ्रकाम् ॥
निर्गमस्तु समाख्यातः शेषं मूलवदेव तु ।
लिङ्गमानः स्मृतो ह्येष द्वारमानमथोच्यते ॥ * ॥
कराग्रं वेदवत् कृत्वा द्वारं भागाष्टकं भवेत् ।
विस्तरेण समाख्यातं द्विगुणं चोच्छ्रया भवेत् ॥
द्वारवत् पीठमध्ये तु शेषं सुषिरकं भवेत् ।
पादिकं शेषिकं भित्तिर्द्वारार्द्धेन परिग्रहात् ॥
तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् ।